# प्रारम्भिक प्रार्थनम्

1) वागीशाऽद्या स्सुमनस स्सर्वार्थाना मुपक्रमे।

यन्नत्वा कृतकृत्या स्स्यु स्तन्नमामि गजाऽननम्।।

2) सरस्वति नमस्तुभ्यं वरदे कामरूपिणि।

विद्याऽरम्भं करिष्यामि सिद्धिर्भवतु मे सदा।।

3) गुरुर्ब्रह्मा गुरुर्विष्णुर् गुरुर्देवो महेश्वरः।

गुरुस्साक्षात् परंब्रह्म तस्मै श्रीगुरवे नमः।।

4) शिवनामनि भाविततेन्तरंगे

महति ज्योतिषि मानिनीमयार्थे।

दुरितान्यपयान्ति दूरदूरे

मुहुरायान्ति महान्ति मंगळानि।।

श्रीमहागणाधिपतये नमः। श्री महासरस्वत्यै नमः।

श्री गुरुभ्यो नमः। हरिः ओम्।।

ओंकारमाद्यं प्रवदन्ति सन्तो

वाच.श्श्रुतीनामपि ये गृणन्ति।

गजाननं देवगणाऽऽनतांघ्रिं

भजेऽहमर्धेन्दु.कृतावतंसम् ।।१

पादारविन्दार्चन तत्पराणां

संसार.दावानल.भङ्गदक्षम्।

निरन्तरं निर्गत.दान.तोयै-

स्तं नौमि विघ्नेश्वर.मम्बुजाऽऽभम्२।।

# समाप्ति प्रार्थनम्

यदक्षर पदभ्रष्टं मात्राहीनन्तु यद् भवेत्।
तत् सर्वं क्षम्यतां देव नारायण नमोऽस्तुते।।

शारदा शारदाम्भोज - वदना वदनाम्बुजे।
सर्वदा सर्वदास्माकं सन्निधि स्सन्निधिं क्रियात्।।

---

नाहं देहो नेन्द्रियाण्यन्तरङ्गो नाऽहङ्कारः प्राणवर्गो न बुद्धिः। दाराऽपत्यक्षेत्रवित्ताऽऽदिदूर-स्साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥ १ ॥

रज्ज्वज्ञाना.द्भाति रज्जौ यथाऽहि-स्स्वात्माज्ञाना.दात्मनो जीवभावः। आप्तोक्त्याऽहिभ्रान्तिनाशे स रज्जु-र्जीवो नाऽहं देशिकोक्त्या शिवोऽहम्॥ २॥

आभातीदं विश्वमात्मन्यसत्यम्- सत्यज्ञानाऽऽनन्दरूपे विमोहात्। निद्रामोहात् स्वप्नवत् तन्न सत्यम्- शुद्धः पूर्णो नित्य एक.श्शिवोऽहम् ॥ ३ ॥

नाऽहं जातो न प्रवृद्धो न नष्टो- देहस्योक्ताः प्राकृताः सर्वधर्माः। कर्तृत्वादि.श्चिन्मयस्याऽस्ति नाऽहं-कारस्यैव ह्यात्मनो मे शिवोऽहम्॥ ४ ॥

मत्तो नाऽन्यत् किञ्चिदत्राऽस्ति विश्वं- सत्यं बाह्यं वस्तु मायोपक्लृप्तम्। आदर्शान्त.र्भासमानस्य तुल्यं- मय्यद्वैते भाति तस्मा.च्छिवोऽहम्॥ ५ ॥

---

कायेन वाचा मनसेन्द्रियैर्वा

बुध्यात्मना वा प्रकृतेस्स्वभावात्।

करोमि यद्यत् सर्वं सकलं

परस्मै नारायणायेति समर्पयामि।।

---

हरिः ओम्। तत् सत्।।